**केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे समारब्धा विभिन्ना: परियोजना:-**

**केन्द्रीयसंस्कृतविश्वविद्यालये अनेका: परियोजना: प्रतिवर्षम् अनुसन्धानकार्यार्थं निर्गच्छन्ति तत्र काश्चन अष्टादशीपरियोजनारूपेण, काश्चन च अमृतमहोत्सवस्यान्तर्गते भवन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे अपि अनेका: परियोजना प्राध्यापकै: आवेदिता आसन्, तत्र न्यायविभागस्य परियोजनात्रयं साहित्यविभागस्य द्वे, पुस्तकालयस्य एका, ज्योतिषविभागस्य एका परियोजना च एवं सप्तपरियोजना अत्र स्वीकृता: सन्ति। एतासां संयोजका: क्रमेण न्यायविभागस्य डा.सच्चिदानन्दस्नेहीमहोदया:, साहित्यस्य डा.अनिलकुमारमहोदया:, पुस्तकालयस्य श्रीनवीनडोबरियालमहोदया:, ज्योतिषस्य परिसरनिदेशका: प्रो.पी.वी.बी.सुब्रहमण्यममहोदयाश्च सन्ति। सर्वासां परियोजनानामुद्घाटनकार्यक्रम: 20.04.2023 दिनांके 4.00 वादने सम्मलेनकक्षे परिसरनिदेशकमहोदयानां निर्देशने डा.अनिलकुमारस्य च संयोजने समभवत्। कार्यक्रमेऽस्मिन् आदौ वैदिकमंगलाचरणं वेदविभागस्य प्राध्यापकेन डा.अमन्दमिश्रमहोदयेन कृतम्, सर्वेषामुपस्थितानां स्वागतं व्याकरणविभागस्य प्राध्यापिका डा.मनीषाआर्या कृतवती। तदनन्तरं डा.सच्चिदानन्दस्नेहीमहोदयेन न्यायविभागे प्राप्तानां परियोजनानां विषये उक्तम्- तत्र एका परियोजना न्यायदर्शनस्य ऐतिहासिकग्रन्थस्य हिन्दीभाषायाम् अनुवादरूपेण विद्यते, अपरा प्रशिक्षणरूपेण, अन्या च न्यायभाषा एवं प्रशिक्षणरूपेण विद्यते एवं न्यायविभागे तिस्र: परियोजनानां परिचय:, तत्र कथं च कार्यं तदुपरि भविष्यति चर्चा कृता। श्रीनवीनडोबरियालमहोदयेन पुस्तकालयविषयिणी संस्कृतपरियोजनाविषये सूचना प्रदत्ता, इयं परियोजना आई.के.एस. अन्तर्गते आसीत्। डा.अनिलकुमारेण साहित्यस्य आधुनिकग्रन्थानां कोशनिर्माणसन्दर्भे अपि च भारतीयकविशिक्षाविषये कथमनुसंधानकार्यं भविष्यति तस्मिन् विषये उक्तम्। अनन्तरं प्रो.पी.वी.बी.सुब्रहमण्यममहोदयेन ज्योतिषविषयिणीपरियोजनाया विषये सूचना प्रदत्ता। अन्ते श्रीजनार्दनसुवेदीमहोदयेन सर्वेषां धन्यवाद: कृत:। कार्यक्रमस्य सञ्चालनं डा.अनिलकुमारेण कृत आसीत्। अस्मिन्नवसरे सर्वे प्राध्यापका: छात्राश्च समुपस्थिता आसन्। शान्तिपाठेन कार्यक्रमस्य सम्पूर्ति: संजाता।**







**उद्घाटनकार्यक्रमस्य छायाचित्राणि**